श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ मरकतपद्धतिः एकोनविंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ मरकतपद्धतिः एकोनविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वन्दे गारुत्मतीं वृत्त्या मणिस्तोमैश्च पादुकाम्।
यया नित्यं तुळस्येव हरितत्वं प्रकाश्यते॥ **19.1** ॥

सविलासगतेषु रङ्गभर्तुः
    त्वदधीनेषु बहिष्कृतो गरुत्मान्।
अधिगच्छति निर्वृतिं कथञ्चित्
    निजरत्नैस्त्वयि पादुके ! निविष्टैः॥ **19.2** ॥

समये मणिपादुके ! मुरारेः
    मुहुरन्तःपुरमुग्धचेटिकास्ते।
हरितान् हरिदश्मनां मयूखान्
    तुळसीपल्लवशङ्कया क्षिपन्ति॥ **19.3** ॥

हरितः सहसा हरिन्मणीनां
    प्रभया रङ्गनरेन्द्रपादरक्षे !।
तुळसीदलसम्पदं दधाति
    त्वयि भक्तैर्निहितः प्रसूनराशिः॥ **19.4** ॥

प्रसादयन्ती मणिपादुके ! त्वं
    विक्षेपयोगेन विहारवेलाम्।

हरिन्मनोज्ञा हरिकान्तिसिन्धोः
    सन्दृश्यसे शैवलमञ्जरीव ॥ **19.5** ॥

बध्नासि रङ्गेश्वरपादरक्षे !
    हरिन्मणीनां प्रभया स्फुरन्त्या।
चूडापदेषु श्रुतिसुन्दरीणां
    माङ्गल्यदूर्वाङ्कुरमाल्यपङ्क्तिम् ॥ **19.6** ॥

अच्छेद्यरश्मिनियतैर्घटिता हरिद्भिः
    सद्वर्त्मना गतिमती मणिपादरक्षे !।
सन्दृश्यसे सवितृमण्डलमध्यभाजो
    रङ्गेश्वरस्य रथसम्पदिवापरा त्वम् ॥ **19.7** ॥

श्यामायमाननिगमान्तवनोपकण्ठाः
    स्थाने पदावनि ! हरिन्मणयस्त्वदीयाः।
पर्यन्तशाद्वलवतीं प्रथयन्ति नित्यं
    नारायणस्य रुचिरां नखरश्मिगङ्गाम् ॥ **19.8** ॥

उद्दिश्य कामपि गतिं मणिपादरक्षे !
    रङ्गेश्वरस्य चरणे विनिवेशितात्मा।
प्रायो हरिन्मणिरुचा दृढभक्तिबन्धा
    प्रादुष्करोति भवती तुळसीवनानि ॥ **19.9** ॥

सेवार्थमागतवतां त्रिदशेश्वराणां
    चूडामणिप्रकरशालिषु मौळिषु त्वम्।
संवर्तयस्यसुरमर्दनपादरक्षे !
    स्वेनाश्मगर्भमहसा शुकपङ्क्तिशोभाम् ॥ **19.10** ॥

दरपरिणतदूर्वा वल्लरीनिर्विशेषैः
    मरकतशकलानां मांसलैरंशुजालैः।

पशुपतिविधृता त्वं तस्य पाणौ निषण्णं
 मधुरिपुपदरक्षे ! वञ्चयस्येणशाबम् ॥ **19.11** ॥

हरिचरणसरोजन्यासयोग्यं भवत्याः
 प्रगुणमभिलषन्त्यो वर्णलाभं तुळस्यः।
प्रतिदिनमुपहारैः पादुके ! तावकानां
 मरकतशकलानामाश्रयन्ते मयूखान् ॥ **19.12** ॥

हरितमणिमयूखैरञ्चिताध्यात्मगन्धैः
 दिशसि चरणरक्षे ! जातकौतूहला त्वम्।
दनुजमथनलीलादारिकाणामुदारां
 दमनकदळपङ्क्तिं देवि ! मौलौ श्रुतीनाम् ॥ **19.13** ॥

अधिगतबहुशाखैरश्मगर्भप्रसूतैः
 मधुरिपुपदरक्षे ! मेचकैरंशुजालैः।
अनितरशरणानां नूनमारण्यकानां
 किमपि जनयसि त्वं कीचकारण्यदुर्गम् ॥ **19.14** ॥

प्रचुरनिगमशाखां पादुके ! रङ्गिणस्त्वां
 चरणनखमयूखैश्चारुपुष्पानुबन्धाम्।
मरकतदळरम्यां मन्महे सञ्चरन्तीं
 कनकसरिदनूपे काञ्चिदुद्यानलक्ष्मीम् ॥ **19.15** ॥

नखकिरणनिकायैर्नित्यमाविर्मृणाले
 महितरसविशेषे मेचकैरंशुभिस्ते।
परिकलयसि रम्यां पादुके ! रङ्गभर्तुः
 पदकमलसमीपे पद्मिनीपत्रपङ्क्तिम् ॥ **19.16** ॥

अनिमिषयुवतीनामार्तनादोपशान्त्यै
 त्वयि विनिहितपादे लीलया रङ्गनाथे।

दधति चरणरक्षे !  दैत्यसौधानि नूनं
    मरकतरुचिभिस्ते मङ्क्षु दूर्वाङ्कुराणि ॥ **19.17** ॥

विपुलतममहोभिर्वीतदोषानुषङ्गं
    विलसदुपरिनैल्यं देवि !  विष्णोः पदं तत्।
पृथुमरकतदृश्यां प्राप्य पादावनि !  त्वां
    प्रकटयति समन्तात् सम्प्रयोगं हरिद्भिः ॥ **19.18** ॥

पद्माभूम्योः प्रणयसरणिर्यत्र पर्यायहीना
    यत्संसर्गादनघचरिताः पादुके !  कामचाराः।
तारासक्तं तमिह तरुणं प्रीणयन्ते जरत्यो
    नित्यश्यामास्तव मरकतैर्नूनमाम्नायवाचः ॥ **19.19** ॥

स्थलकमलिनीव काचित् चरणावनि !  भासि कमलवासिन्याः।
यन्मरकतदळमध्ये यः कश्चिदसौ समीक्ष्यते शौरिः ॥ **19.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे मरकतपद्धतिः एकोनविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥